# परोपकार:

परेषाम् उपकार: परोपकार: कथ्यते। स्वार्थं परित्यज्य यदा अन्येषां कल्याणं क्रियते तत् परोपकार: कथ्यते।

परोपकार: मानवस्य एक: उत्तम: गुण: अस्ति। परोपकारेण जनेषु सुख-शान्ति वृद्धि: भवति। महात्मा दधीचि परोपकाराय एव स्वशरीरस्य अस्थीनि अपि ददौ प्राणान् अपि अत्यजत्।

न केवलं मनुष्य: अपितु प्रकृति: अपि परोपकारे रता दृश्यते। नद्य: स्वयमेव जलं न पिबन्ति, वृक्षा: स्वयं फलानि न खादन्ति किन्तु तेषां जलं तेषां फलानि च परोपकाराय एव भवन्ति।

अत: अस्माभि: अपि सदा परोपकार: करणीय:। तस्य मानवस्य जीवनं धिक् य: परोपकारं न करोति।

Sanskrit By: Arunesh Sir